# ॥ गोपालहृदयस्तोत्रम् ॥

.. gopAlahRidayastotram ..

sanskritdocuments.org

July 25, 2016

# Document Information

Text title : gopAlahRidayastotram
File name : gopaalahriday.itx
Category : hRidaya
Location : doc_vishhnu
Author : Traditional
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : WebD
Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
Latest update : January 11, 2005
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

# ॥ गोपालहृदयस्तोत्रम् ॥

श्री गणेशाय नमः ।
ॐ अस्य श्रीगोपालहृदयस्तोत्रमन्त्रस्य । श्रीभगवान् सङ्कर्षण ऋषि ।
गायत्री छन्दः । ॐ बीजम् । लक्ष्मीः शक्तिः । गोपालः परमात्मा देवता ।
प्रद्युम्नः कीलकम् । मनोवाक्कायार्जितसर्वपापक्षयार्थे
श्रीगोपालप्रीत्यर्थे गोपालहृदयस्तोत्रजपे विनियोगः ।
श्रीसङ्कर्षण उवाच ।
ॐ ममाग्रतः सदा विष्णुः पृष्ठतश्चापि केशवः ।
गोविन्दो दक्षिणे पार्श्वे वामे च मधुसूदनः ॥ १॥

उपरिष्टात्तु वैकुण्ठो वाराहः पृथिवीतले ।
अवान्तरदिशः पातु तासु सर्वासु माधवः ॥ २॥

गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतोऽपि वा ।
नरसिंहकृताद्गुप्तिर्वासुदेवमयो ह्ययम् ॥ ३॥

अव्यक्तं चैवास्य योनिं वदन्ति व्यक्तं देहं दीर्घमायुर्गतिश्च ।
वह्निर्वक्त्रं चन्द्रसूर्यौ च नेत्रे दिशः श्रोते घ्राणमायुश्च वायुम् ॥ ४॥

वाचं वेदा हृदयं वै नभश्च पृथ्वी पादौ तारका रोमकूपाः ।
अङ्गान्युपाङ्गान्यधिदेवता च विद्यादुपस्थं हि तथा समुद्रम् ॥ ५॥

तं देवदेवं शरणं प्रजानां यज्ञात्मकं सर्वलोकप्रतिष्ठम् ।
अजं वरेण्यं वरदं वरिष्ठं ब्रह्माणमीशं पुरुषं नमस्ते ॥ ६॥

आद्यं पुरुषमीशानं पुरुहूतं पुरस्कृतम् ।
ऋतमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सनातनम् ॥ ७॥

महाभारतमाख्यानं कुरुक्षेत्रं सरस्वतीम् ।
केशवं गां च गङ्गां च कीर्तयेन्मां प्रसीदति ॥ ८॥

ॐ भूः पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ भुवः पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ स्वः पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ महः पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ जनः पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ तपः पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ सत्यं पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ भूर्भुवः स्वः पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ वासुदेवाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।

ॐ सङ्कर्षणाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ प्रद्युम्नाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ अनिरुद्धाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ हयग्रीवाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ भवाद्भवाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ केशवाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ नारायणाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ माधवाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ गोविन्दाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ विष्णवे पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ मधुसूदनाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ वैकुण्ठाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ अच्युताय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ त्रिविक्रमाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ वामनाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ श्रीधराय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ हृषीकेशाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ पद्मनाभाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ मुकुन्दाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ दामोदराय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ सत्याय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ ईशानाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ तत्पुरुषाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ पुरुषोत्तमाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ श्री रामचन्द्राय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ श्री नृसिंहाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ अनन्ताय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ विश्वरूपाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः ।
ॐ प्रणवेन्दुवह्निरविसहस्रनेत्राय पुरुषाय
पुरुषरूपाय वासुदेवाय नमो नमः ।
य इदं गोपालहृदयमधीते स ब्रह्महत्यायाः पूतो भवति ।
सुरापानात् स्वर्णस्तेयात् वृषलीगमनात् पति सम्भाषणात्
असत्यादगम्यागमनात् अपेयपानादभक्ष्यभक्षणाच्च पूतो भवति ।
अब्रह्मचारी ब्रह्मचारी भवति । भगवान्महाविष्णुरित्याह ।
॥ इति गोपालहृदयस्तोत्रं सम्पूर्णम् ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

.. gopAlahRidayastotram ..
was typeset on July 25, 2016

Please send corrections to *sanskrit@cheerful.com*